RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2018-20
Approved Journal by UGC - No 40484

॥ ओ३म् ॥

संसार तापदग्धानां त्रयो
विश्वान्ति हेतवः।
अपत्यञ्च कलत्रञ्च सतां
संगतिरेव च॥

( चाणक्य-नीति )

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

॥ ओ३म् ॥

निःस्पृहो नाधिकारी
स्यान्नाकामी मण्डनप्रिय।
ना विदग्धः प्रियं ब्रूयान
स्पष्टवक्तान वंचकः॥

( चाणक्य-नीति )

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइट.: www.sanskritsamvad.com मूल्यम्-रू. ५/-

卐 वर्षम्-८ 卐 अंकः-११ ( १७९ ) 卐 १ दिसम्बरः २०१८ तः १५ दिसम्बरमासः २०१८ पर्यन्तम् 卐 विक्रमसंवत्-२०७५ 卐 सृष्टिसंवत्-१,९६,०८,५३,११६ 卐 पृष्ठम्-८

## राममन्दिरनिर्माणे विलम्बेन जनानां धैर्यः निस्सरति-योगगुरुरामदेवः

हरिद्वार। पतंजलि योगीपीठ माध्यमेन द्वि वर्षतः संचालित पतंजलि गुरूकुलस्य विधिवत् उद्घाटन समये संघप्रमुख मोहनभागवत उक्तवान यत् अद्य मनुष्यं मनुष्य निर्माणकर्तृ ज्ञानस्यावश्यकताऽस्ति। पतंजलि गुरूकुलस्य स्थापनया एवं शिक्षाया उद्येस्य पूर्णः भविष्यति।



अनेन ज्ञानेन सह चरित्रनिर्माणमपि भविष्यति।

अस्मिन्नवसरे योगगुरू रामदेवः उक्तवान यत् राम राष्ट्रस्य स्वभावोऽस्ति। हिन्दु एवं मुस्लिम उभयस्य पूर्वजोऽस्ति। अतः रामन्दिर निर्माणस्य मार्ग अवश्यमेव भविष्यम्। मन्दिरनिर्माणस्य विलम्बेन जनानां धैर्य निस्सरन्ति। अस्यां स्थितौ द्वयेव विकल्पोऽस्ति प्रथमं सर्वकार नियमस्य निर्माणं करोतु अथवा जनाः स्वयमेव निर्माण कार्यं प्रारम्भ कुर्वन्तु। कार्यक्रमे जूनाअखाड़ायाः पीठाधीश्वर आचार्य महामण्डलेश्वर स्वामी अवधेशानन्दगिरि महाराज उक्तवान यत् रामदेवः विश्वे योग एवं आयुर्वेदं नूतन दिशा प्रदर्शितवान।

## साहित्यकारहिमांशुजोशी दिवंगतो जातः

पूर्वी दिल्ली। प्रसिद्ध साहित्यकार एवं पत्रकार हिमांशु जोशी वृहस्पतिवासरे रात्रि 12.30 वादने मयूर विहार फेस-एक स्थित समाचार भवने दिवंगतो जातः शुक्रवासरे मध्याह्ने निगम बोध



घाटे परिजन एवं पत्रकारानां मध्ये अन्मिम संस्कारः अभवत्। ते बहु दिनात् पूर्वमेव व्याधि ग्रसितो आसीत्। ते 83 वर्षीय आसीत्।

तं साहित्य एवं पत्रकारिताः क्षेत्रे अहं योगदानाय पुरस्कारेण सम्मानितं कृतवान। "छाया मत छुना मन" "मनुष्य चिन्ह" श्रेष्ठ आंचलिक कहानी एवं गंधर्व कथा अनया उत्तर प्रदेश हिन्दी संस्थागतः पुरस्कृत कृतवान। कथा एवं भारत रत्न पं. गोविन्द बल्लभपंत इत्यनया हिन्दी अकादमी दिल्लीपक्षतः सम्मानितो जातः। तीन तारे इत्यं राजाभाषा विभाग विहार पक्षतः सम्मानितो जातः। एवं पत्रकारितायाः क्षेत्रे स्व. गणेशशंकर विद्यार्थि पुस्कारेण सम्मानितो जातः।

ओ३म्
भारत में फैले सम्प्रदायों की निष्पक्ष व तार्किक समीक्षा
के लिए उत्तम कागज, मनमोहक जिल्द एवं सुन्दर आकर्षक मुद्रण
(द्वितीय संस्करण से मिलान कर शुद्ध प्रामाणिक संस्करण)
सत्य के प्रचारार्थ
सत्यार्थ प्रकाश
सत्य के प्रचारार्थ

| | | |
|---|---|---|
| • प्रचार संस्करण (अजिल्द) 23×36÷16 | मुदित मूल्य 50 रु. प्रचारार्थ 30 रु. | प्रचारार्थ मूल्य पर कोई कमीशन नहीं |
| • विशेष संस्करण (सजिल्द) 23×36÷16 | मुदित मूल्य 80 रु. प्रचारार्थ 50 रु. | |
| • स्थूलाक्षर सजिल्द 20×30÷8 | मुदित मूल्य 150 रु. | प्रत्येक प्रति पर 20% कमीशन |

10 या 10 से अधिक प्रतियाँ लेने पर विशेष अतिरिक्त कमीशन
कृपया, एक बार सेवा का अवसर अवश्य दें और महर्षि दयानन्द की अनुपम कृति **सत्यार्थ प्रकाश** के प्रचार प्रसार में सहभागी बनें
आर्ष साहित्य प्रचार ट्रस्ट
427, मन्दिर वाली गली, नया बांस, दिल्ली-6
Ph. :011-43781191, 09650622778
E-mail : aspt.india@gmail.com

## राममन्दिरादतिरिक्तं किमपि स्वीकार्यं नास्ति

वाराणसी। ज्योतिष एवं शंकराचार्य स्वामी स्वरूपानन्द सरस्वती इत्यस्य आदेश-आर्शिर्वादेन् स्थापित परम धर्म संसद-1008 इत्यत्र द्वितीय दिवस श्रीराम मन्दिर निर्माणस्य चर्चा जातः।



सीरगोवर्धनपुरे देश-विदेशतः समागत धर्मांसद एकस्वरे उक्तवन्तः राममन्दिररातिरिक्त किमपि स्वीकारो नास्ति। सर्वकारपक्षतः अयोध्यायां भव्य प्रतिमा व संग्राहलय एव एवञ्च काम्प्लेक्स इत्यादिभिः निन्दा अपि अभवत्। देशतः सभागत रामभक्तः राममन्दिरे विलम्बस्य निन्दा कृतवन्तः।

सोमवासरे प्रातः सदनस्य कार्य आरम्भो जातः द्वि सत्रे मन्दिर रक्षा विधेयकेन् सह धर्मांतरणम् वैदिक शिक्षा पद्धति व गंगा संरक्षण सदृश विषयेषु धर्मांसद गहन विचार-विमर्शः कृतवन्तः। अयोध्यातः संमागत रसिक पीठाधीश्वर महंत जन्मेजय शरण महाराजः दूःख प्रकती कृत्वा उक्तवान यत् राममन्दिरे बहु विलम्बो जातः इदानीं शंकराचार्यस्य नेतृत्वे सर्वे राममन्दिरे स्वाहुतिं ददतु। जनता माध्यमेन चयनित सांसदोऽपि धर्मसंसदे भागं गृहीतव्यम्। स्वरूपानन्दसरस्वती उक्तवन्तः यत् परमधर्मसंसदस्य उद्देययं राजनैतिक दलस्य गठनं नास्ति।

आगामि धर्मसंसद प्रयागे भविष्यतिः शंकराचार्यस्य शिष्य प्रतिनिधि व परम संसद 1008 इत्यस्य प्रवर धर्माधीश स्वामी अविमुक्तेश्वरानन्द सरस्वती आगामि धर्मसंसदस्य घोषणा कृतवन्तः।

## पुनः दिल्ली आर्यप्रतिनिधिसभाया अध्यक्षरूपेण चितः श्रीधर्मपाल आर्यः

नवदेहली। दिल्ली आर्य प्रतिनिधि सभायाः त्रिवार्षिक साधारण अधिवेशन दिनांक 25 नवम्बर 2018 वर्षे आर्य समाज, हनुमानरोड नवदेहल्यां सम्पन्नोजातः। अधिवेशने श्री धर्मपाल आर्यः पुनः सर्वसम्मति रूपेण चितः। अधिवेशने निर्वाचण अधिकारी रूपे आर्यप्रतिनिधि सभा



हरियाणायाः प्रधान मा.राज्यपाल महोदयः उपास्थिताः आसन्। मा. राज्यपाल माध्यमेन प्रधान पद हेतुं उपस्थित प्रतिनिधयः अन्येषां नामानि प्रस्तुत करणाय उक्तवन्तः, परञ्य अन्येषां नामानि प्रस्तुत न अभवत् तदर्थं श्री धर्मपाल महोदयं सर्वसमत्या आगामि त्रीवर्षाय प्रधान रूपे निर्वाचितम्।

शेषभागःद्वितीयेपुटे

प्रथमपुटस्य शेषभागः **पुनः दिल्ली आर्य**

तत्पश्चात् निर्वाचित प्रधान धर्मपाल आर्यः समितेः अन्य सदस्यानां सूचि प्रस्तुतवान यं निर्वाचन अधिकारी निर्वाचित घोषितवान।



चुनाव प्रक्रियान्ते मा. राज्यपालः उक्तवान यत् सर्वे आर्यप्रतिनिधि संस्थायाः उच्चमानदण्डान् ध्येय समाज सुधार एवं वैदिक धर्म प्रचारस्य कार्यान् गतिं ददातु। ते अधिवेशने शन्ति सौहार्द हेतु सर्वात् आर्य प्रतिनिधीन् धर्मवादं दत्तवन्तः। अन्ते नवनिर्वाचित प्रधान श्रीधर्मपालआर्य एवं महामंत्री श्रीविनयआर्यः सर्वाषां आर्यप्रतिनिधिनां आभारं ज्ञापयित्वा स्व महत्वपूर्ण दायित्वस्य पूर्णतयाः संकल्पः नीतवान्।

## कुशीनगरे (D.I.E.T. मध्ये ) पंचदिवसीया संस्कृतवाग्व्यवहारकार्यशाला प्रारब्धा

उत्तरप्रदेशसंस्कृतसंस्थानम्। लखनऊ एवं राज्य-शैक्षिक -अनुसंधान-एवं-प्रशिक्षण-परिषद्-लखनऊ इत्यनयोः संस्थयोः संयुक्ततत्वावधाने पंचदिवसीयायाः संस्कृत-वाग्व्यवहार-कार्यशालायाः समायोजनं दिनांक: 27/11/2018 तः 1/12/2018 पर्यंतम् (D.I.E.T)जिल्ला-



शिक्षा एवं प्रशिक्षणसंस्थानम्,कुशीनगरे 112 सर्वकारीयविद्यालयीयशिक्षकाणां कृते जातम् । अस्याः समुद्घाटनसमारोहः

27/11/2018 दिनांके प्रातः 10 वादने जातः

यत्र मंचसंचालकः नूतनविष्णुरेग्मी(संस्कृतभाषाप्रशिक्षकः)

आसीत् । आदौ मंगलाचरणम् कृष्णमुरारी तिवारी(संस्कृतभाषाप्रशिक्षकः)कृतवान्। अतिथयश्च सरस्वतीपूजनं, दीपधूपप्रज्वलनं च कृतवन्तः। कृष्णमुरारी तिवारी(संस्कृतभाषाप्रशिक्षक)कार्यशालायाः प्रास्ताविकं श्रावितवान्। तेनैव मंचासीनानां अतिथीनां पुष्पैः स्वागतं कृतम्। कार्यक्रमे मुख्यातिथित्वेन श्रीः अरुणकुमारमहोदयः (जिला बेसिक शिक्षा अधिकारी,C.B.S.A.,कुशीनगरम्

अध्यक्षत्वेन च श्री:मनमोहन-शर्मा,नोडल अधिकारी एवं कार्यशालायाः अस्याः संयोजकः (प्राचार्यः,D.I.E.T)जिल्ला-शिक्षा एवं प्रशिक्षणसंस्थानम्,कुशीनगरम् राराजमानौ आस्ताम्। तौ अपि संस्कृतस्य महत्वं प्रतिपादयन् एतादृश्यः संस्कृतकार्यशालायाः आधुनिकपरिप्रेक्ष्ये उपयोगितां च अकथयताम्। नूतनविष्णुना (संस्कृतभाषाप्रशिक्षकेण) कार्यशालायाः लक्ष्यं,प्रारूपं च स्पष्टीकृतम्।

कार्यशालायां अस्यां गोरखनाथः,सत्यम तिवारी, शिवप्रताप मिश्रः,नूतनविष्णुरेग्मी,कृष्णमुरारी तिवारी च प्रशिक्षकत्वेन उपस्थितानां 100 प्रशिक्षूणां (सर्वकारीयविद्यालयीयशिक्षकाणां) प्रशिक्षणंगणद्वये (गौतमगणे-50,बुद्धगणे-50=100) प्रक्षेपकयंत्रं संगणकं च प्रयुज्य PPT SLIDES द्वारा प्रतिदिनं) (पंचसु दिवसेषु प्रातः10 वादनतः सायं 5 वादनपर्यन्तं पंचहोरासु पंचसत्राणि,आहत्य 50 सत्राणि)करिष्यन्ति। सर्वेभ्यः प्रक्षिक्षुशिक्षकेभ्यः लेखनी-संचिका-टिप्पणीपुस्तिकाः UP संस्कृतसंस्थानपक्षतः UP SCERT पक्षतः च वितरिताः। धन्यवादज्ञापनं कृष्णमुरारी तिवारी(संस्कृतभाषाप्रशिक्षकः) अकरोत्। इत्थं सहोद्घोषेण शान्तिमन्त्रेण समुद्घाटनसमारोहस्यास्य सम्पूर्तिः अभवत्।

## आर्यवरिष्ठमाध्यमिकविद्यालये श्रीमद्भगवद्गीता श्लोकोच्चारणप्रतियोगितायाः आयोजनमभवत्

हरियाणा संस्कृत अकादमी पंचकूला माध्यमेन आर्यवरिष्ठ माध्यमिक विद्यालय अम्बाला शहरे जिला स्तरीय श्रीमद्भगवद्गीता श्लोकोच्चारण प्रतियोगितायाः अयोजनमभवत्। अत्र अनेक संस्थातः प्रतिभागी समागताः आसन्। अस्यातिरिक्त डॉ. जे.एस.नैन जी (सवानिवृत प्राचार्य) डॉ. आर.के.चौहान जी (सेवानिवृत प्रचार्य) डॉ. कामदेवझा (प्राचार्य डी.ए.वी महाविद्यालय पिहोवा) सुप्रसिद्ध वैद्य मनोचाजी (अम्बाला शहर) श्रीराजीवमल्होत्राजी (प्राचार्य आर्य विद्यालय), डॉ.




नरेन्द्र जी डॉ. रवीन्द्र सहगलजी, डॉ. अक्षयमिश्राजी, डॉ. सत्यवीरसिरोही (बूरा), डॉ. चन्द्रकुमारझा, श्रीरामरत्नगर्गजी (अम्बाला) डॉ. विवेककोहली जी (प्राचार्य) श्री गुलशन चानना जी, श्री




अनीलगुप्ताजी, श्री एच.के.गुलाटी जी। श्रीरनधीरचौधरी, श्रीश्यामसुन्दजी, डॉ.सहगलजी, श्रीराकेशगोयलजी, श्रीप्रेमशर्माजी, श्रीजितेन्द्रजी (वरिष्ठ पत्रकार), मतीसरोजगुप्ताजी उपस्थिताः आसन्। हरियाणा संस्कृत अकादम्याः निदेशक डॉ. सोमेश्वरदत्त मुख्यातिथि आसीत्।



सुर्यकपि पंडित लखमी चंद जांही इत्यस्य जीवने आधारित चलचित्रस्य निर्माण कार्य प्रचलति। ते संस्कृतस्य ग्रन्थानां हरिभानवी भाषायां अनुवादं कृत्वा समाजे प्रसारितवान। तेषां जिह्वायां सरस्वती आसन्। एतेषां माध्यमेन निर्मित भजनस्यानन्दः इदानीमपि जनाःश्रृण्वन्ति। ते स्वजीवने गोशाला एवं "नीम" वृक्षस्य रोपणमपि कृतवन्तः। तं सर्वे जानन्ति एवं यावत् हरियाणायाः संस्कृति भविष्यति तावत् तेषां नाम भविष्यति।

# राजकीयउच्चत्तरमाध्यमिक बालविद्यालये वार्षिकोत्सवस्यायोजनम्

नवदेहली। मालवीयनगरेस्थित उ.मा.बा विद्यालये बहुहर्षोल्लासेन् वार्षिकोत्सवः सुसम्पन्नो जातः। दिल्ली सर्वकारतः संचालितोऽयं विद्यालयः। दिसम्बरमासे अस्य उत्सवस्यायोजनमभवत्। कार्यक्रमास्यारम्भः दीपप्रज्वालनेन एवञ्च संस्कृतश्लोक मंगलगीतेनाभवत्। उत्सवे मुख्यातिथि




रूपेण डी.डी.ई जोन समागता आसन्। कार्यक्रमस्य अध्यक्षता कर्मठ छात्रवत्सल प्रधानाचार्य श्री सतपालसिंह कृतवन्तः। कार्यक्रमे टी.डी.सी श्री ब्रह्मदेवशर्मा अस्य कार्यक्रमस्य रूपरेखायाः निर्माणं कृतवन्तः एवञ्च तेन् सः मुख्यरूपेण आमेवीरसिंह महाशयोऽपि आसन्। कार्यक्रमे सर्वे शिक्षकाः स्व कर्त्तव्यस्य निष्ठा पूर्वकं निर्वहनं कृतवन्तः एवं छात्रा अपि अनुशासनस्य पालनं कृत्वा कार्यक्रमस्य शोभावर्धनं कृतवन्तः। कार्यक्रमस्य संचालनं पाण्डेय महाभागाः एवञ्च महावीर महोदयः कृतवन्तः। एवञ्च अन्ते छात्रान् पुरस्कारमपि दत्तवन्तः।

**पाठकानां कृते सूचनाः-**

**कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- (संस्थादीनां कृते) द्विवार्षिकशुल्क रु. २४०/- (व्यक्तीनां कृते) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते।**

**वित्तकोषविवरणम्-**

**Sanskrit samvad,**
**Current A/C No. 224902000000142,**
**Indian Overseas Bank, Yamuna Vihar, Delhi-110053**
**IFC Code- IOBA0002249**

# 'दशदिवसीया-संस्कृतवाग्व्यवहारकार्यशालायाः समापनसमारोहः प्रमाणपत्रवितरणं च'

उत्तरप्रदेशसंस्कृतसंस्थानेन संतकबीरनगरस्थे श्रीसांगवेद-आदर्श-संस्कृतमहाविद्यालये 10/11/2018 तः 22/11/2018 पर्यन्तं सरलसंस्कृतसंभाषणशिविरयोजनान्तर्गतं दशदिवसीयासंस्कृतवाग्व्यवहारकार्यशाला संचालिता। यत्र द्वौ



प्रशिक्षकौ(विनोदकुमारत्रिपाठी,नूतनविष्णुरेग्मी च)23 छात्रान् व्यावहारिकसंस्कृतं सरलरीत्या ,संगणकसाहाय्येन,ppt उपयोगेन च अपाठयताम्। छात्राः पंचहोरात्मिकाकक्षानन्तरं संस्थानेन प्रदत्ताः अभ्यासपुस्तिकाः अपि पूरयन्ति स्म। 10/11/18 दिनांके अस्याः कार्यशालायाः अनौपचारिकरूपेणोद्घाटनं



जातमासीत्। समापनसमारोहः 22/11 ।18 दिनांके जातः। तत्रैव गतकार्यशालायाः भागग्रहणप्रमाणपत्राणि मंचासीनैः अतिथिभिः छात्रेभ्यः प्रदत्तानि ।कार्यक्रमे महाविद्यालयस्य प्राचार्यस्य राष्ट्रपतिसम्मानितस्य डा.हरिद्वारशुक्लवर्यस्य श्रीमनीषकुमारयादववर्यस्य ,पं नर्वदेश्वरवर्यस्य,श्रीगणेशधरद्विवेदीवर्यस्य च सान्निध्यमासीत्। कार्यशालायाः संचालने कदाचित् गोरक्षपुरदेवीपाटनयोः परिक्षेत्रयोः परिक्षेत्रसमन्वयकस्य श्रीनागेशदूबेमहोदयस्यापि अपेक्षितमार्गदर्शनं भवति स्म। एतादृश्यः कार्यशालाः उत्तरप्रदेशराज्यस्य प्रत्येकं जनपदेषु प्रचालिताः उत्तरप्रदेशसंस्कृतसंस्थानेन।

---

# श्रीमद्भगवद्गीतायामलङ्काराः

डॉ अरविन्द कुमार तिवारी

मानवजीवनसमलङ्कृतिहेतवे समुदिष्टमेतच्छास्त्रं श्रीमद्भगवद्गीताख्यं न कस्याप्येकस्य मानववर्गस्य कल्याणाय, अपितु सर्वजनजीवनसागरतरणाय जनतारकमुखनिर्गतसरलशब्दतरणी वर्तते। सर्वोपनिशत्सारभूतमिदं शब्दार्थौ सहितौ काव्यमितिधिया काव्यत्वं भजमानमवलोक्यत इव। किं च वाक्यं रसात्मकं काव्यमितिलक्षणमपि[1] सङ्गच्छते। 'धर्मक्षेत्रे कुरुक्षेत्र समवेता युयुत्सवः[2] ,तस्माद्युध यस्व भारत[3], तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चय[4] मामनुस्मर युध्य च[5] ,यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धर[6] इति वचनेन ''क्लैब्यं मा स्म गमः पार्थ[7] ''इत्यनेन च वीररसैकमात्रसंवलितं शास्त्रेतद्धि आचार्यमम्मटोक्तं तददोशो शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापीत्यपि[8] सर्वलाक्षणिकसमादृतलक्षणमनुतिष्ठत एवेति मदीयो विमर्शः। काव्यषोभाकरान् धर्मानलङ्कारान् प्रचक्षते[9] इति साधयन्तोऽनेके शब्दालङ्कारा अर्थालङ्काराश्चास्य काव्यत्वं समुपस्थापयन्त्येव। अधुनात्र भगवतोक्तश्रीमद्भगवद्गीतायां केचनालङ्कारा विमृश्यन्ते।

1–वृत्त्यनुप्रासः।

एकस्याप्यासकृत्परः। अर्थात् एकस्य अपिशब्दादनेकस्य व्यंजनस्य द्विर्बहुकृत्वो वा सादृष्यं वृत्त्यनुप्रासो नामालङ्कारः श्रूयते।[10]

क–धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।
मामकाः पाण्डवाश्चैव किमकुर्वत संजय।।[11]

अत्र क्षेत्रे, क्षेत्रे,मकवतवर्णानां चानेकावत्तेर्वत्त्यनुप्रासः।

क–अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम्।।
पर्याप्तं त्विदमेतेशां बलं भीमाभिरक्षितम्।।[12]

अत्र पर्याप्तं– पर्याप्तं, बलं –बलं, भिरक्षितं –भिरक्षितमिति।

ख–न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्।
भूतभृन्न च भूतस्थो ममात्माभूतभावन।।[13]

भूतमित्यस्यानेकावृत्तित्वादत्र वृत्त्यनुप्रासोऽलङ्कारः।

ग–मोघाषा मोघकर्माणो मोघज्ञाना विचेतसः।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः।।[14]

मोघ, मोघ इत्यस्यानेकवर्णासकृदावृत्तेर्वृत्त्यनुप्रासः।

घ–मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैश्यसि युक्त्वैवमात्मानं मत्परायणः।।[15]

मकारस्यानेकावृत्तेर्वृत्त्यनुप्रासः।।

2–छेकानुप्रासः।

सोऽनेकस्य सकृत्पूर्वः। अनेकस्य अर्थात् व्यंजनस्य सकृदेकवारं सादृश्यं छेकानुप्रासः भवतीति वदत्याचार्यो मम्मटः।[16]

क–नासतो विद्यते भावो नाभावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः।।[17]

सतः सतः, भावः ,भावः इत्यनेनच्छेकानुप्रासो दर्शितः।

ख– यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्।।[18]

स्पश्टमत्र यो, यो, यां– यां, तस्य–तस्य , श्रद्धा– श्रद्धा इत्यनेनानेकव्यंजनवर्णानां सकृदावृत्तेृछेकानुप्रासः।

ग– यं यं वापि स्मरन्भावं त्यजन्त्येते कलेवरम्।
तं तमेवैति कौन्तेय सदा तद्भावभावितः।।[19]

यं–यं, तं –तं अत्राप्यनेकवर्णानां सकृदावृत्तित्वाच्छेकानुप्रासः।

# सम्पादकीयम्

काव्यरसलोलुपाः कविभ्रमराः!

सामोदं वन्दे।

भवतां भवतीनां करसरोरुहे संस्कृतसंवादस्य नवांकमुपायनीकुर्वाणाहम् अतीवानन्दमनुभवामि। सत्यमेदभाति यत् अस्मिन् स्वर्णिमे काले संस्कृतस्य सम्यक्प्रचारो विधीयमानो वर्तते। सर्वत्र संस्कृतसंस्थानेजु संस्कृतविश्वविद्यालयेषु संस्कष्टतस्य कार्यक्रमाः दृष्टिपथमारूढाः नन्दयन्ति चेतः। विपश्चितः! अयं कालः संस्कृतसाहित्यखण्डे अभिराजयुगनाम्ना कीर्त्यते। महाकवीनामेषां भूयसी संस्कृतरचनाः संस्कृतवाङ्मयमभिवर्धयन्ति। काव्यं नाटकं गलज्जलिका कथा इत्येतत्सर्वमपि अद्वितीयं वर्तते। विभावयन्तु समीक्षकाः यदि क्वचिदपि शोधसंगोष्ठी समायोज्यते तत्र प्रायशः विश्रुतकीर्तिर्महाकविरभिराजराजेन्द्रमिश्रः शोधार्थिनां प्रमुखो विषयो भवति। सरस्वतीसुतोऽयं यायावरीय इव सर्वत्र संस्कृतविकासाय श्रद्धया समाहूतः बहूनि कष्टानि सोढ्वापि गोष्ठीं समलंकरोति। न शेते न विश्राम्यति न वा व्यर्थमालपति। मन्मतानुसारमयमभिनवः कालिदासो विलसति भारतभुवि। भारतसर्वकारेण विदेशे सम्प्रेषितः महाकविरयं भारतीयां संस्कृतिमनयत् तत्र तत्र सर्वत्रापि।

अभिलषामो वयं यत् सर्वेऽपि विद्वांसः नवयुवकाः वृद्धाश्च प्रेमिश्रसमानाः कथं न सुरभारतीसेवनेऽनारतं दृश्यन्ते? यद्यपि अगणिताः सुधियो वर्तन्ते ये स्वस्वगत्या संस्कृतिं संस्कृतं च सेवमानाः सन्ति किन्तु सर्वानतिशेते महाकविरभिराजो राजेन्द्रमिश्रः। अयं गतभयो मनीषी पटुर्वक्ता सनातनपरम्परासेवी विद्वान् त्रिवेणीकविनाम्ना जगति प्रथितो वर्तते। युवकानां प्रेरकः कवितावनितावल्लभः भूयादमर इहेति कामयमाना संस्कृतस्य समुज्ज्वलं भविज्यं विलोकमानाहं स्वीयां वाणीं समाप्नोमि।

अमरवाणी विजयताम्

## वेदामृतम्

**( ऋग्वेदभाष्यम् )**

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

तान् यजत्राँ ऋतावृधोऽग्ने पत्नीवतस्कृधि।
मध्वः सुजिह्व पायय।।७।।

अर्थ-इस मन्त्र में श्लेषालङ्कार है। मनुष्यों को अच्छी प्रकार ईश्वर के आराधन और अग्नि की यकुशलता से रससारादि को रचकर तथा उपकार में लाकर गृहस्थ आश्रम में सब कार्यों को सिद्ध करना चाहिए ।।७।।

फिर उक्त पदार्थ किस प्रकार के हैं, इस विषय का उपदेश द्य अगले मन्त्र में किया है-

ये यजत्रा य ईड्यास्ते ते पिबन्तु जिह्वया।
मधोरग्ने वर्षट्कृति ।।८।।

अर्थ-मनुष्यों को इस जगत् में सब संयुक्त पदार्थों से दो प्रकार का कर्म करना चाहिए, अर्थात् एक तो उनके गुणों का जानना, दूसरा उनसे कार्य की सिद्धि करना। जो विद्युत् आदि पदार्थ सब मूर्त्तिमान् पदार्थों से रस को ग्रहण करके फिर छोड़ देते हैं, इससे उनकी शुद्धि के लिए सुगन्धि आदि पदार्थों का होम निरन्तर करना चाहिए, जिससे वे सब प्राणियों को सुख सिद्ध करनेवाले हों।।8।।

किस प्रकार के मनुष्य उन गुणों का ग्रहण कर सकते हैं, इस द्य विषय का उपदेश अगले मन्त्र में किया है-

आकीं सूर्यस्य रोचनाद् विश्वान् देवाँ उषर्बुधः।
विप्रो होतेह वैक्षति ।।९।।

अर्थ-इस मन्त्र में श्लेषालङ्कार है। जो ईश्वर इन पदार्थों को उत्पन्न नहीं करता तो कोई पुरुष उपकार लेने को समर्थ नहीं हो सकता और जब मनुष्य निद्रा में स्थित होते हैं, तब कोई मनुष्य किसी भोग करने योग्य पदार्थ को प्राप्त नहीं हो सकता, किन्तु जाग्रत अवस्था को प्राप्त होकर उनके भोग करने को समर्थ होता है। इससे इस मन्त्र में 'उषर्बुधः' इस पद का उच्चारण किया है। संसार के इन पदार्थों से बुद्धिमान् मनुष्य ही क्रिया की सिद्धि को कर सकता है, अन्य कोई नहीं ।।९।।

किसके साथ में यह विद्युत् अग्नि क्रियाओं की सिद्धि करानेवाला होता है, सो अगले मन्त्र में कहा है-

तृतीयपुटस्य शेषभागः

# श्रीमद्भगवद्गीतायामलङ्काराः

3–उपमा।

यत्रोपमानोपमेययोस्सादृष्यं तत्रोपमा नामालङ्कारः। यथाचार्यमम्मटभणितिः।

सादृष्यमुपमा भेदे।[20]

क– वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देहि।।[21]

अत्र शरीरस्य जीर्णत्वं किं वानित्यत्वं संसाधयन्भगवान् लौकिकमुदाहरणमुस्थापयति। वासांसि उपमानम्,देह उपमा, जीर्णता साधारणधर्मः। यथा वाचकशब्दः। इत्येवं प्रकारेणात्र पूर्णोपमा।

ख–यदा संहरते चायं कूर्मोऽङ्गानि सर्वशः।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठा।।[22]

अत्र स्थिरबुद्धिजनस्येन्द्रियाणि उपमानपदवाच्यानि, कच्छपस्याङ्गानि उपमेयमानि, विषयपार्थक्यं साधारणधर्मः,इववाचकशब्दस्तस्मात्पूर्णोपमा।

ग– आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्।
तद्वत्कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी।।[23]

अत्र समुद उपमानं, स स्थितप्रज्ञः उपमेयः, प्रविष्टिस्साधारणधर्मः, पूर्णोपमा उपमायाः सर्वाङ्गोपलब्धेरिति। उपमाया रम्याण्युदाहरणानि अत्रापि द्रष्टव्यानि यानि विस्तरभयान्नेह प्रदत्तानि। 15–10, ।।6–19, ।6–34,–7, 11–28,11–29,14–32,14–33,18–38

4– उत्प्रेक्षा। उपमेयस्य उपमानेन सार्द्धं सम्भावनोत्प्रेक्षेति काव्यप्रकाशकृदुक्तिः। सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्।[24]

क गाण्डीवं स्रंसते हस्तात्त्वैव परिदह्यते।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः।।[25]

मनसो भ्रमणोत्कटकल्पनं क्रियया इवयोगत्वं चेत्युप्रेक्षात्वं दर्शयति।

5– प्रतिवस्तूपमा।

यत्रैक एक एव साधारणधर्मस्य भिन्नवाक्यद्वयेनोपादानं तत्र प्रतिवस्तूपमा नामालङ्कार इति वचनमाचार्यमम्मटस्य।सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः।[26]

क–तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान् स्वबान्धवान्।
स्वजनं हि कथं हत्वा सुखिनः स्यां माधव।।[27]

उदाहरणेऽस्मिन् उत्तरार्द्धवाक्यार्थः उपमानरूपः, पूर्वार्द्धवाक्यार्थ उपमेयरूपष्च स्तः। एकस्यैवानौचित्यरूपधर्मस्य पूर्वार्द्धे हन्तुं नार्हा इतिपदेन उत्तरार्द्धे च स्वजनं हि कथं हत्वा इत्यनेन पदेन कथनं प्रतिवस्तूपमालङ्कारतां साधयति।

6–रूपकम्। उपमानोपमेययोरभेदवशाद्रूपकमङ्गीकरोत्याचार्यप्रवरो मम्मटः। तद्रूपकमभेदो यः उपमानोपमेययोः।[28]

क– यदा ते मोहकलिलं बुद्धिर्व्यतितरिश्यति।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च।।[29]

अत्र मोहोपमेये कलिलोपमानाभेदारोपाद्रूपम्।

ख–न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठा।
अश्वत्थमेनं सविरूढमूलमसङ्गशस्त्रेण दृढेन छित्वा।।[30]

अत्र संसारोपमेये अश्वत्थोपमानाभेदारोपात् असङ्गोपमेये च शस्त्रोपमानाभेदारोपाद्रूपकम्।

7–संसृष्टिरलङ्कारः।

यत्र द्वयोरलङ्कारयोर्भेदेन दर्शनं तत्र संसृष्टिर्नामालङ्कारः। सेष्टा संसृटिरेतेशां भेदेन यदिह स्थितिः।[31]

क–व्यामिश्रेणेव वाक्ययेन बुद्धिं मोहयसीव मे।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम्।।[32]

अत्र उपमानसाधारणधर्मलुप्तोपमा वाक्यमुपमानं तच्च लुप्तं, तद्वद् वाक्येन उपमेयत्वम्, मिश्रणमितिसाधारणधर्मः, इव वाचकषब्दः। मोहसीवेत्ययेत्र क्रियया इवयोगादुत्प्रेक्षा अनयोर्नैपेक्ष्येण संसृष्टिरलङ्कारः।

ख–स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम।
भूतभावन भूतेश देवदेव जगत्पते।।[33]

भतवर्णयोरनेकावृत्तेवृत्त्यनुप्रासस्तथा देव देव इत्यत्र यमकोपपत्तेस्संसृष्टिरलङ्कारः।

8 –अर्थान्तरन्यासः।

अस्मिन् विशये आचार्यमम्मटोक्तिरियम्।
सामान्यं वा विशेषे वा तदन्येन समर्थ्यते।
यत्तु सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा।।[34]

पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते
न हि कल्याणकृत्कश्चिद् दुर्गतिं तात गच्छति।।[35]

तस्य अयतेः श्रद्धयोपेतस्य साधकस्य पुरुषस्य विनाशो नैव जायत इत्यस्य पूर्वार्द्धवाक्यस्य न हि कल्याणकृदित्यनेनोत्तरार्द्धवाक्येन समर्थनादर्थान्तरन्यासोऽलङ्कारः।

सन्दर्भाः–


1 साहित्यदर्पण :1–3 ,
2 श्रीमद्भगवद्गीता 1–1,
3 तत्रैव 2–18 ,
4 तत्रैव 2–37
5 तत्रैव 8–37,
6 तत्रैव 18–78,
7 तत्रैव 2 –3 ,
8 काव्यप्रकाशः 1–4,
9 काव्यादर्शस्य द्वितीयपरिच्छेदे,
10 काव्यप्रकाषः 9–79,
11 श्रीमद्भगवद्गीता 1 –1
12 तत्रैव 1–10 ,
13 तत्रैव 9–5,
14 तत्रैव 9–12 ,
15 तत्रैव 10–34,
16 काव्यप्रकाशः 9–79
17 श्रीमद्भगवद्गीता 2–5 ,
18 तत्रैव 7–21,
19 तत्रैव 8–6,
20 काव्यप्रकाशः10–87
21 श्रीमद्भगवद्गीता 1–22 ,
22 तत्रैव 2–58 ,23 तत्रैव 1–70,
24 काव्यप्रकाशः 10–92
25 श्रीमद्भगवद्गीता 1–30,
26 तत्रैव 3–2 ,
27 काव्यप्रकाशः 10–101,
28 श्रीमद्भगवद्गीता 1–37
39 काव्यप्रकाषः 10–93 ,
30 श्रीमद्भगवद्गीता 2–52,
31 काव्यप्रकाशः 10–139
32 श्रीमद्भगवद्गीता 3–2 ,
33 तत्रैव 10–15
34 काव्यप्रकाशः 10–109,
35 श्रीमद्भगवद्गीता 6–40


## लेखकानां कृते निवेदनम्

समोदं संसूचयामो यत् दिल्लीतः प्रकाश्यमाना संस्कृत-संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सृजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्ण कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्भृता च स्यात्। आशास्महे भवन्तः निजपरितः जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्योः प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयुः ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयुः। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखाः स्फुटैः अक्षरैः संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमम्।
- लेखस्य मूलं प्रति प्रेषयेयुः हस्तलिखितछायाप्रतिलेखाः न स्वीक्रियन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोधः व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचितः लेखः मासात् पूर्वम् एव प्रेषणीयः।
- कथाम् लेखञ्च येऽनुवादं कृत्वा प्रेषयितुम इच्छेयुः ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयुः।
- ई-मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन-चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखाः पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीयः।

# विधायकस्य व्यथा

डॉ० निरञ्जनमिश्रः
श्री भगवानदास-आदर्शसंस्कृतमहाविद्यालयः, हरिद्वारम्

जनता सदा मम निन्दने कुरुते रतिं निजचिन्तनात्
खलवञ्चकः कपटी मृषावादप्रियो वदतीह माम्।
निजदर्पणे पररूपदर्शनमिच्छतां पुरतः स्थितः
स्वयमस्मि लोकविधायकः श्रवणे कुरुष्व मम व्यथाम्।।1।।

पठितं मया नहि पुस्तकं न कृतं गुरोः पदसेवनं
कुलवृद्धवाक्यरसेन नैव निषिञ्चितं निजजीवनम्।
विगतान्यजीवनपद्धतिर्जनसेवने कठिनश्रमो
विहितो मया ससुखं भवेत्किल येन जीवनयापनम्।।2।।

जनभावनागममर्मचिन्तनदीक्षितैरिह पूर्वजै-
र्नयपालकैर्गुणहीनलोकहिताय रक्षितपद्धतिः।
जनसेवनस्य यया सतामसताञ्च जीवनसाधनं
सुगमं भवेन्ननु गद्यमद्यमयीव दिव्यकथाऽपगा।।3।।

निजकार्यसाधनकौशलं न कदापि विज्ञविगर्हितं
स्वधियो विलासमुपासितुं न हि कः स्वतन्त्रमुपासते।
भवतां मतेन भवाम्यहं भवतां विलासनियोजको
विनियोजनं स्वधिया करोमि किमत्र निन्दनकारणम्।।4।।

व्यवसायिनः क्रयणेऽथवा निजवस्तुविक्रयणे सदा
निजमार्गबाधकखण्डने विनियोजयन्ति निजां मतिम्।
न हि तेन तत्र विनिन्दनं भवतीति न हि जानन्ति के
स्वयमेव चिन्तय चातुरी तव काऽधुना मम निन्दने।।5।।

जनसेवकत्वमवाप्तुमत्र कृतं मया क्रियते च किं
शृणु विस्तरेण वदामि यद्यपि गोपनीयमिदं मम।
जनतापमानमिहाकलय्य भवाम्यहं घनवारिदः
प्रखरांशुमानथवा सतां मुखमण्डने हि रतिर्मम।।6।।

जनकर्दमे निजनामपङ्कजकाशने ननु कः श्रमो
भवतीति वेत्ति विभाकरो नहि कर्दमो विधियोगतः।
गुणिनां गणे गुणिनः प्रशंसनमेव सागरमन्थनं
कथमज्ञकीर्तनमत्र तैर्नहि चातुरीनिकषोपलः।।7।।

परदोषदर्शनकाँक्षिणो ननु विस्मरन्ति निजं गुणं
गुणहीनताऽवगुणं चिनोति जयस्तु तच्चयनेन मे।
परहस्तमुद्रितपत्रसंकलनश्रमेण यशस्विनो
यदि निन्दनं वद का गतिर्लघुवृत्तिसंग्रहणेन ते।।8।।

निजपूर्वजार्जितगौरवस्मरणे त्वया विहिता रति-
स्तदुपायखण्डनचिन्तने गमितं मया निजजीवनम्।
विपरीतमार्गसमर्चनेन वृतोऽस्म्यहं विजयश्रिया
समयं विलोक्य हि कार्यसाधनचातुरी ननु चातुरी।।9।।

कलहेन जीवनयापनं सुकरं कुतो निजबन्धुषु
प्रियवञ्चनं जननिन्दनं गिरिभारतोऽप्यतिदुर्भरम्।
विजृम्भावनौ गमनं विपक्षशरासनाननरोधनं
फणिराजदन्तविपाटनं क्रियते सदा बलशालिना।।10।।

न जयो विना मतसञ्चयं न धनं विना मतसञ्चयो
न हि वञ्चनेन विना धनं न हि वञ्चनं स्वधिया विना।
स्वधियो विलासमुपास्य जीवति योऽधुना स विधायकः
सहभागिता तव वर्तते तदुपासनाविषयार्थिनी।।11।।

मम वर्ज्यपञ्चकमेव जीवनमस्ति नीतिविकल्पितं
स्थिरता तथापि जयश्रियो न हि निश्चितास्ति सुखार्थिनी।
पुनरेव लोकमतार्जनञ्च पुनस्तथैव धनार्जनं
धनसंग्रहाय पुनस्तदेव विखण्डनोचितसाधनम्।।12।।

न धनं विना जनता करोति कदापि मद्गुणकीर्तनं
मदिरां विना मतदानकर्मणि नो रतिर्जनमानसे।
उभयोर्व्ययं ह्यधिकारिणामधिकारविक्रयणे रतिं
विनियोज्य यद्विदधे तदर्थमहं कथं वद निन्दितः।।13।।

निजयौवने बहुधा जनैरिह ताडितो ह्यपसारितो
विकटाभियोगबलान्निबन्धनमावहं जनरक्षिभिः।
जनसेवकोत्सवसाधकैरिह पोषितः परिचायितो
जनसेवकत्वमवाप्य जीवनयापने निरतोऽस्म्यहम्।।14।।

प्रथमे जये जनशोषणेन समर्चितं निजजीवनं
भवतां प्रसादबलाद् द्वितीयतयेन तर्पितबान्धवः।
विजयेऽधुना जनसेवनाय समर्पितोऽस्मि तृतीयके
यदि कश्चिदेति नवो जयी पुनरत्र सैव कथा भवेत्।।15।।

व्यभिचारिणोऽहितकारिणोऽवगुणोच्चयाचलवासिनो
जनघातका गृहदाहका मधुपायिनो रसदायिनः।
मधुलम्पटा पथबाधका जनदूषिता भयहेतवो
दलितास्तथा यवना निरर्थकजीवना खलतस्कराः।।16।।

रणभीरवः कुलघातका ननु बालविक्रयिणस्तथा
बुधचन्द्रमण्डलराहवो विधिलेखलंघनसूदिनः।
अभयं गता खलु येन तत्पदरागिणो जनतोषका
गतिहीन बुद्धिविहीनमानसमोदका हि विधायकाः।।17।।

चतुरानन! त्वमिहाद्य दण्डशतेन योजय मां चिरं
हर वा मदर्जितपुण्यपापफलं क्वचिनिमलतीह चेत्।
भुवनं भराजगरैरथोन्मदमत्तवारणदारुणै-
र्हर भूतलादधुना समाजविदारकान् हि विधायकान्।।18।।

# व्याससमारोहोद्घाटनवेलायाम्

## वसुचन्द्रभद्राञ्जलिः

डॉ० रमाकान्तशुक्लः

व्यासाय नमोऽस्तु ते मदीयं
वसिष्ठगोत्रभवाय शक्तिपौत्र।
विष्णोरवतार! ते जयः स्वात्
पौराणिकार्चितपादपद्म धीमन् ।। 1

त्रातं भवता कुलं कुरूणां
मातुर्निदेशवशादतन्द्रितेन।
यस्मिञ्छतवान् परीक्षितो राट्
पुण्यां कथां शुकवक्त्रपद्मगीताम् ।।2

यस्य प्रतिभास्ति पूजनीया
यस्याद्भुतं किल भारतं चकास्ति ।
वेदार्थविकासकारिणं तं
वन्दामहे शुकतात् तम्बुजांघ्रम् ।। 3

पौराणिकवाङ्मयं प्रणीतम्
धन्यं जगत्रयमस्ति यत्प्रभावात् ।
भद्राञ्जलिरर्प्यते मया ते
पादाम्बुजातयुगेऽतिभक्तिपूर्वम् ।।4

दत्वा धृतराष्ट्र-सादिने यो
दिव्यां दृशं प्रविलोकयाञ्चकार ।
युद्धस्य सजीवदृश्यजातं,
तं श्रीपराशरजातकं नमामि ।। 5

चक्रे तपसान्वितो मनोज्ञं
यो मद्वयं ह्यथ भद्वयं पुराणम् ।
अष्टादशसंख्यया परीतं
ज्ञानाब्धिमन्थनभूधरं तमीडे ।। 6

श्रीमद्वसुदेवसूनुलीलाः
यो भक्तितः प्रविगीतवान् मनस्वी ।
व्यासो जयति प्रधीर्महर्षिः,
सर्वर्थसाधकभारतस्य कर्ता ।। 7

पुण्याय परोपकार उक्तः
पापाय चापकृतिर्मता हि येन ।
द्वैपायनकृष्णसंज्ञकं तं
व्यासं नमामि सभक्तिभावतोऽहम् ।। 8

व्यासस्य महोत्सवोऽतिभव्यो
संयोज्यते मयराष्ट्रकेऽनुवर्षम् ।
उद्घाटनसत्रशोभिविद्भ्यो
भद्राञ्जलिं समुपायनीकरोमि ।। 9

स्पर्धा-कविमेलनादिकार्यैः
क्षेत्रीयपर्यटनादियोजनेन ।
अभ्यागतमानसेषु भूयात्
व्यासस्य काव्यसुधारसानुरक्तिः ।।10

कालीचरणाख्यपण्डितेन
पौराणिकेन पुरा सूत्रितो महोऽयम् ।
भूयाब्दविकाय निश्वनृणाम्
इत्येष काक्षति सज्जना जनोऽयम् ।।11

पाद्मोक्तसुभाषितावलम्बा
वाक्कौशलप्रतियोगितात्र दृश्या ।
विद्वद्वरसेवितो महोऽयं
शस्यो न कैर्बुधपुँगवैर्जगत्याम् ।। 12

"आत्मानमपीह पश्य बन्धो!
मा त्वं क्षिपान्यजनं कदापि हीनम्।"
धन्या जगतीं प्रबोधयेयुः
सूक्त्यानया कृतचिन्तना युवानः ।। 13

द्वारं च तथा हि कोटपूर्वं
गत्वा जनाः शुभदर्शिनश्च भूत्वा।
यास्यन्ति निजं गृहं प्रसन्नाः
व्यासाशिषा शुभभावना भवन्तः ।। 14

व्यासोत्सव एष शंकरः स्याद्!
देयात्सदा नवनोदनं युवभ्यः ।
आचार्यसुधाकरेण
संख्यावतां हृदि राजतां सदैव ।। 15

आहूत इहास्मि यैर्जनैस्तान्
प्रत्यानतिं विनिवेदयामि हृष्टः ।
ये चेह जना उपस्थितास्ते
सर्वे मुदा निजजीवने लसन्तु ।। 16

व्यासोत्सव-सत्र चालकेभ्यो
देया मया मुदितेन साधुवादाः ।
ये के च पुरस्कृतीर्लभेरन्
तेभ्योऽप्यथो शुभकामनाः प्रदेयाः ।। 17

भद्राञ्जलिनामथेयवृत्ते
पद्यानि यानि मयात्रार्पितानि।
गृह्णन्धा इमानि नूनम्
आम्यासिकीं रचनामिवामनन्तः ।।18



# ‘मनोगतम्’ - 50

## प्रसारण-तिथिः - 25-11-2018



-संस्कृत-भाषान्तरं
द्वारा- डॉ.बलदेवानन्दसागरः
Cell- 9810 5622 77
Email - baldevanand.sagar@gmail.com

मम प्रियाः देशवासिनः ! नमस्कारः। एतच्छताब्दस्य चतुर्दशे वर्षे ओक्टोबर-मासे तृतीय-दिनाङ्के विजयादशमी-पर्वणि ‘मनकीबात’- इति कार्यक्रमस्य माध्यमेन सहैव वयं सर्वे सम्भूय, यात्रामेकामारभाम। ‘मनकीबात’- इत्यस्याः प्रसारण-यात्रायाः पञ्चाशदङ्काः अद्य पूर्णतां यान्ति। एवं हि अद्यायं सुवर्ण-जयन्ती-आख्यानं वर्तते। एतस्मिन् क्रमे भवतां यानि पत्राणि अवाप्तानि, दूरभाषाकारणाश्च सञ्जाताः, तत्राधिसंख्यं अस्य पञ्चाशदङ्कस्य सन्दर्भे एवास्ति। MyGov-इत्यत्र दिल्ल्याः अंशु-कुमारः अमर-कुमारश्च,पटनातः विकास-यादवः;तद्वद् NarendraModiApp- इत्यत्र दिल्ल्याः मोनिका-जैनः, पश्चिम-बङ्गस्य वर्धमानतः प्रसेनजीत-सरकारः, नागपुरस्य संगीता-शास्त्री चेत्यादयः प्रायेण समानमेव प्रश्नमपृच्छन्, एते कथयन्ति यत् प्रायेण जनाः अधुनातन-प्रविधिना, सामाजिक-सञ्चार-माध्यमैः Mobile Apps-प्रभृतिभिः संयुताः भवन्ति, परञ्च जनैः साकमात्मानं संयोजयितुं भवता रेडियो-इति प्रसारण-माध्यमं कथं चितम् ?

भवतामेषा जिज्ञासासुतरां स्वाभाविकी यत् अद्यतने युगे यदा प्रायेण रेडियो-माध्यमं विस्मारितमासीत्, तदा मोदि-महोदयः रेडियो-माध्यमं कथं स्वीकृतवान् ! वृत्तान्तमेकं श्रावयामि । अष्ट-नवत्युत्तरैकोनविंश-शत-वर्षीयोऽयं वृत्तान्तः, अहं भारतीय-जनता-दलस्य संघटनस्य कार्यकर्तृरूपेण हिमाचल-राज्ये कार्यनिरतः आसम् । मे-मासीयः कालः आसीत् तथा चाहं सायंकाले यात्रानिरतः सन् कुत्रचित् अन्यस्मिन् स्थाने गम्यमानः आसम्। हिमाचलस्य पार्वत्य-क्षेत्रेषु सायं शैत्यं तु विवर्धते एव, तदा मध्येमार्गं एकस्मिन् ढाबा-इति पथिकापणेचाय-पानार्थम् अरुन्धि। सः लघु-पथिकापणः अवर्तत, एकः एव सः चायं निर्माति विक्रीणाति स्म, आपणोपरि आच्छादक-वस्त्रमपि नासीत्, केवलं मार्गोपान्तं लघु-शकटं स्थापयित्वा स्थितः आसीत्। यदाहं चाय-दानार्थम् आदिशम् तदा सः स्वीय-शकटस्थात् काच-भाण्डात्, मोदकमेकं निष्कास्य अवादीत् -महोदय! चायपानम् अनन्तरम्, प्रथमं मोदकं स्वीकरोतु। मिष्टान्नेन मधुरास्वादम् अनुभवतु । अहमाश्चर्यम् अन्वभवम्, यतो हि मया पृष्टम् - किं भो! को नाम विशेषः ? गृहे कश्चन उद्वाह-प्रसङ्गो वा ? तेनोत्तरितम् - नैव नैव बन्धुवर ! किं भवान् नैव जानाति ? अयि भो ! अतितरां प्रसन्नतायाः वृत्तान्तः7 सः भूरिशः समुत्साहितः हर्षातिरेक-भरितः चासीत्, मया पृष्टं -किं जातम् ? सः सावेगम् अब्रवीत् यत् अयि भो ! अद्य भारतं विस्फोटं व्यदधात् । अहमवदम् - भारतंविस्फोटंव्यदधात् ? नावगच्छामि किमपि ! तदा सः स्पष्टमकरोत् - पश्यतु महोदय, रेडियो-प्रसारणं शृणोतु। तदा रेडियो-प्रसारणेषु सः एव विषयः परिचर्च्यते स्म। तदास्माकं प्रधानमंत्रीअटलबिहारीवाजपेयी आसीत् - तद्धि परमाणु-परीक्षण-दिनमवर्तत, तथा च, सः सञ्चार-माध्यमेभ्यः वृत्तमेतत् उद्घोषितवान्, सः चायापणिकः रेडियोतः घोषणामेनां श्रुत्वा आनन्द-सन्दोहानुभवेन नृत्यति स्म। नितरामहम् आश्चर्यमन्वभवम् यत् अरण्यस्य निर्जनेऽस्मिन् प्रदेशे, हिमाच्छादितेषु पार्वत्य-क्षेत्रेषु सामान्योऽयं जनः यो हि चाय-यानं स्थापयित्वा निजकार्यं करोति, आदिनं रेडियो-प्रसारणं शृण्वन् तिष्ठति, तथा च रेडियो-वार्तानां तावान् प्रभावः तस्य मनसि जातः,एतावान् च दृढः परिणामः संवृत्तः। ततः प्रभृति एतत् वृत्तं मम मनसि बद्धमूलं जातं यत् रेडियो-माध्यमं नाम प्रतिजनं सम्बद्धम् । रेडियो-माध्यमं बलवत्तमम्। सञ्चारस्य सहज-प्रापणं तस्य च गहनता ! कदाचित् नान्यत् अपरं किञ्चित् रेडियो-माध्यमेन आत्मानं तूलयितुं प्रभवति । कदाचित् तत्कालादारभ्य मम मनसि एतादृशः संस्कारः समजायत, अस्य माध्यमस्य सामर्थ्यं कदाचित् तत्कालादेव अनुभवन्नासम् । अत एव, यदाहं प्रधानमन्त्रि-पदमारूढवान्, तदेदं स्वाभाविकमासीत् यत् शक्तिमत्तममिदं माध्यमं प्रति ममावधानमभ्यागच्छेत् । एतच्छताब्दस्य चतुर्दशे वर्षे मे-मासे यदाहं ‘प्रधान-सेवक’-रूपेण कार्यभारं सम्भालितवान् तदा मम मनसि समीहासीत् यत् देशस्य एकता, अस्मदीयो भव्येतिहासः, अस्य शौर्यम्, भारतस्यविविधताः, अस्माकं सांस्कृतिक-वैविध्यम्, अस्मदीय-समाजस्य प्रतिश्वासं समाहितानि सद्वृत्तानि, जनानां पुरुषार्थः, समुत्साहः, त्यागः, तपस्या चेत्यादीनि सर्वाणि तथ्यानि, भारतस्यैषा कथा, प्रतिजनं प्रापिता स्यात्। देशस्यदूर-सुदूर-वर्तितभ्यो ग्रामेभ्यः महानगराणि यावत्, कृषकेभ्यः आरभ्य युव-व्यवसायि-पर्यन्तं भारतस्यैषाकथा सूचितास्यात्। एवं हि, एतस्मादेव भावात् ‘मनकीबात’-प्रसारणस्य यात्रा आरब्धा जाता। प्रतिमासं लक्षशः पत्राणि पठन्निव, दूरभाषाकारणाः शृण्वन्निव ,App-MyGov-चेत्यत्र लब्धाः टीप्पणीः प्रतिक्रियाश्च अवलोकयन्निव, तथा च, एतत्सर्वम् एकस्मिन् सूत्रे संग्रथ्य, सरलं पेशलञ्च च वृत्तान्त-जातम् उदीरयन्निव पञ्चाशदङ्कानामेका यात्रा,एषा यात्रा वयं सर्वे सम्भूय अकुर्म । इतः परम् अग्रेसारिण्या यात्रया सह सिंहावलोकनस्यापि अयमेकोऽवसरः। ‘मनकीबात’-कार्यक्रमेण वयं भारतस्य प्रतिकोणं यात्रा-सौभागयं लब्धवन्तः यस्यां वयम् अस्माकम् अनेकेषां प्रतिभाशालिनां नागरिकाणां असाधारण-कार्याणि अपि अवालोकयाम । ‘मनकीबात’-कार्यक्रमः अधुना क्षेत्र-धर्मायुः-राजनीति-सदृंशि सर्वाणि बन्धनानि अतिक्रम्य अग्रेसृतो जातः, अयं हि अस्मदीयः सर्वेषामपि निनादः संवृत्तः। नातिचिरम् आकाशवाणी'मनकीबात'-प्रसारणस्य सर्वेक्षणमपि अकारयत्। तासु काश्चन तादृशीः प्रतिक्रियाः अवालोकयम् याः हि अतितरां रुचिकर्यः आसन् । येषां जनानां सर्वेक्षणं विहितं, तेषु प्रायेण प्रतिशतं सप्ततिः जनाः नियमितरूपेण ‘मनकीबात’-कार्यक्रमस्य श्रोतारो वर्तन्ते । जनानाम् अधिसंख्यम् आमिनोति यत् ‘मनकीबात’-प्रसारणस्य सर्वाधिकं योगदानं हि इदमेव यत् अमुना समाजे रचनात्मिका भावनासमेधिता । ‘मनकीबात’-माध्यमेन बृहत्स्तरेण जनान्दोलनानि प्रोत्साहितानि । #indiapositive- इति विषयमाधृत्य व्यापिनी चर्चापि जाता । इयं हि अस्माकं देशवासिनां मनस्सु स्थिता रचनात्मिकायाः भावनास्ति, सकारात्मिकतायाः भावनायाश्चापि निदर्शनमत्र भवति । जनाः तं निजानुभवमपि संविभाजितवन्तः यत् ‘मन की बात’-प्रसारणेन स्वेच्छयापि किञ्चित-करणस्य भावनासमेधिता । एतादृशं किमपि परिवर्तनं जातं यस्मिन् समाज-सेवार्थं जनाः सोत्साहम् अग्रे आयान्ति। एतद्-दृष्ट्वा सुतरां प्रसीदामि यत् ‘मन की बात’-प्रसारणेन रेडियो-माध्यमं समधिकं लोकप्रियमजायत, परञ्च नैतत् केवलं रेडियो-माध्यममेव यस्य माध्यमेन जनाः अमुना कार्यक्रमेण संयुताः भवन्ति। जनाः दृश्यवाहिनी-एफ.एम्.रेडियो-जङ्गम-दूरभाष-अन्तर्जाल-फेस्बुक्-सद्यस्क-periscope-इत्येभिः, युगपदेव NarendraModiApp-माध्यमेन चापि ‘मन की बात’-कार्यक्रमे नैजं सहभागित्वं सुनिश्चितं कुर्वन्तः सन्ति। ‘मन की बात’-परिवारस्य भवद्भ्यः सर्वेभ्योऽपि सदस्येभ्यः विश्वासाधानार्थम्, अस्य चाङ्गीभवनार्थम् अन्तःकरणपूर्वकं धन्यवादान् वितरामि।

‘आदरणीय! प्रधानमन्त्रि-महोदय! नमस्ते ! मम नाम शालिनी, अहं हैदराबादतो वदामि। ममैषा महती जिज्ञासा यत् ‘मन की बात’-कार्यक्रमस्यायं मञ्चः जनेषु अतितरां लोकप्रियः वर्तते परन्तु नाहं स्मरामि यत् भवान् अस्मात् मञ्चात् कदाचिदपि बीजेपी-वा-कांग्रेस-सदृशान् शब्दान् उल्लेखितवान् । किं भवान् कदाचित् नैवम् अनुभवति यत् मञ्चमेनं राजनीतेः कृते उपयोक्तुं पार्यते, आहोस्वित् मञ्चादस्मात् स्वीय-सर्वकारस्य उपलब्धीः गणयितुं पारयेत् ? धन्यवादाः।'

भवत्याः दूरभाषाकारणायै भूरिशो धन्यवादाः। भवत्याः आशङ्का समुचितास्ति। वस्तुतस्तु कश्चन नेता यदा द्वद्वद्द-इति ध्वनि-वर्धकम् प्राप्नोति, कोटि-कोटि-संख्यकाश्च श्रोतारो भवन्ति, तर्हि किमतः परम् अभिलष्यते ? कानिचन युवमित्राणि ‘मन की बात’-प्रसारणे समाविष्टानां सर्वेषामपि विषयाणामध्ययनम् अकुर्वन्। ते सर्वेषामपि प्रसारणानां कोषीय-विश्लेषणम् अकुर्वन्, ते इदमपि अधीतवन्तः यत् को नाम शब्दः कतिवारम् उच्चारितः, के के च शब्दाः पुनः पुनः अभिभाषिताः, तेषामियमेका उपलब्धिः यत् कार्यक्रमोऽयं राजनीतीतरः एवावर्तत। यदा ‘मन की बात’-प्रसारणमारब्धं तदैवाहं निर्णयम् अकरवम् यत् नास्मिन् राजनीतिः स्यात्,न वास्मिन् सर्वकारस्य प्रशंसा भवेत्, नात्र कुत्रचित् मोदी वा भवेत्, तथा च, ममैनं संकल्पं सन्धारयितुं सर्वाधिकं सम्बलम्,महत्तमा च प्रेरणा भवद्भ्यः सर्वेभ्यः प्राप्ता । प्रत्येकमपि ‘मन की बात’-प्रसारणात् प्राक् अधिगम्यमानेषु पत्रेषु,सद्यस्क: टिप्पणीषु, दूरभाषाकारणासु च श्रोतॄणां अपेक्षाः स्पष्टाः भवन्ति। मोदी आगमिष्यति प्रयास्यति च, परञ्च देशोऽयं अचलः स्थास्यति, अस्मदीया संस्कृतिः अमृतास्ति। त्रिंशदुत्तर-शत-कोटि-देशवासिनाम् एताः अल्पाःस्वल्पाश्च कथाः सर्वदैव जीविष्यन्ति। देशमेनं अभिनव-प्रेरणया सोत्साहं नूत्नोन्नतिं प्रति अग्रेसारयिष्यन्ति । अहमपि कदाचिद् सिंहावलोकनं करोमि तदा स्वयमपि महदाश्चर्यम् अनुभवामि। कदाचित् कश्चन,देशस्य कस्मादपि कोणात् पत्रं लिखित्वा कथयति-लघ्वापणिकैः, ऑटो-यानचालकैः, शाकविक्रेतृ-सदृशैश्च जनैः साकमस्माभिः नाधिकतरः मूल्य-विषयको विवादः करणीयः। पत्रमहं पठामि, एतादृशः एव भावः कदाचित् कस्मिन्चित् अपर-पत्रे लिखितोऽस्ति चेत् तमपि सहैव ग्रथ्नामि। युगपदेव स्वानुभवानामपि वृत्तानैक-द्वयोः संविभाजनं भवद्भिः साकं करोमि। भवद्भिः साकं संविभाजयामि, ततः परम्, न जाने कदा एतानि वृत्तानि गृह-कुटुम्बेषु प्रचरन्ति, सामाजिक-माध्यमेषु WhatsApp-इत्यादिषु च परिभ्रमन्ति तथा च, किमप्येकं परिवर्तनं प्रति अग्रेसरन्ति। भवद्भिः प्रेषिताः स्वच्छता-सम्बद्धाः कथाः,सामान्य-जनानाम् अनेकानि उदाहरणानि च,न जाने, कदा प्रतिगृहं स्वच्छतायाः लघुमेकं समङ्कितं दूतं प्रतिष्ठापितवन्ति, यो हि कौटुम्बिकान् अपि अवरोधयति, कदाचिच्च दूरभाषं कृत्वा प्रधानमन्त्रिणमपि आदिशति। कदा कस्यचिदपि प्रशासनस्य तावती शक्तिः भविता यत् selfiewithdaughter-इत्यभियानं हरियाणा-राज्यस्य एकस्मात् लघु-ग्रामात् आरभ्य सम्पूर्णेऽपि देशे एव नैव, विदेशेष्वपि प्रसरेत् । समाजस्य प्रत्येकमपि वर्गः, विशिष्टाः जनाश्च सर्वेऽपि संयुताः भवेयुः, तथा च, अद्यतन-युव-संततिः अवगन्तुं पारयेत्, तादृश्यां नूतनायां आधुनिकभाषायां समाजस्य विचार-परिवर्तनस्य एतादृशंजागरणंप्रसारयेयुः। कदाचित्तु ‘मन की बात’-प्रसारणस्य प्रहसनमपि विधीयते परञ्च मम मनसि सर्वदैव त्रिंशदुत्तर-शत-कोटि-देशवासिनः निवसन्तो विराजन्ते। तेषां मनः मम मनोऽस्ति। ‘मन की बात’-इति प्रसारणं सर्वकारस्य वृत्तं नास्ति-एतत् समाजस्य कथ्यमस्ति। ‘मन की बात’-प्रसारणं हि महत्वकाङ्क्षिणः भारतस्य कथ्यमस्ति। भारतस्य मूल-प्राणः राजनीतिर्नैवास्ति, भारतस्य मूल-प्राणः राजशक्तिरपि नास्ति - भारतस्य मूल-प्राणः समाजनीतिः वर्तते समाज-शक्तिः श्चास्ति। समाज-जीवनस्य परसहस्रं पक्षाः भवन्ति, तेष्वन्यतमः पक्षः राजनीतिरपि विद्यते । राजनीतिः कर्तुमकर्तुं समर्था भवति चेत्, तादृशी व्यवस्था स्वस्थ-समाजस्य कृते हितावहा नैवास्ति। कदाचित्तु राजनीतिक-घटनाः राजनीतिक-जनाश्च तावन्तं प्रभवन्ति यत् समाजस्य अन्याः प्रतिभाः अन्ये च पुरुषार्थाः दमिताः जायन्ते। भारत-सदृशस्य देशस्य उज्ज्वल-भविष्यत्कृते जनसामान्यस्य प्रतिभाः पुरुषार्थाश्च समुचित-स्थानमवाप्नुयुः, इदमस्मदीयं सर्वेषां सामूहिक-दायित्वमस्ति, तथा च,‘मन की बात’-प्रसारणम् अस्यां दिशि नम्रः ईषत्-प्रयासश्च वर्तते।

‘नमस्कार: ! प्रधानमन्त्रिमहोदय ! अहं प्रोमिता-मुखर्जी, मुम्बईतो ब्रवीमि। महोदय ! ‘मन की बात’-प्रसारणस्य प्रत्येकमपि आख्यानं गूढ-प्रबोधेन, सूचनाभिः, रचनात्मक-वृत्तान्तैः सामान्य-जनानाञ्च सम्यक्-कार्यैः सम्भरितं भवति। अतः भवन्तं प्रष्टुं वाञ्छामि यत् प्रत्येकमपि कार्यक्रमात् प्राक् भवान् कियतीं सज्जां करोति ?’

दूरभाष-करणार्थं भवत्यै भूयान्सो धन्यवादाः ! भवत्याः प्रश्नः वस्तुतस्तु आत्मीयत्वेन जिज्ञासिता पृच्छास्ति। आमिनोमि यत् ‘मन की बात’-प्रसारणस्य पञ्चाशत्-आख्यानानाम् उत्कृष्टा सिद्धिरियमेव यत् भवती प्रधानमन्त्रिणा साकं नैव, परन्तु यथा कश्चित् निकटस्थं सहवर्त्तिनं प्रश्नं पृच्छति, बाढम्, इदमेवास्ति लोकतन्त्रम् । भवती यं प्रश्नम् अपृच्छत्, यदि निराडम्बरं उत्तरेयं चेत् तदा वदिष्यामि यत् न किञ्चिदपि सज्जीकरोमि। वस्तुतस्तु ‘मन की बात’-प्रसारणं मम कृते अतितरां सरलं कार्यं वर्तते। प्रतिवारं ‘मन की बात’-प्रसारणात् प्राक् जनानां पत्राणि प्राप्यन्ते। Mygov-NarendraModiMobileApp-इत्यत्र जनाः निज-विचारान् संविभाजयन्ति। एका निःशुल्कं दूरभाष-संख्यास्ति- 1800117800-एकम् अष्टौ शून्यं शून्यम् एकम् एकं सप्त अष्टौ शून्यं शून्यं च। तत्र दूरभाषं कृत्वा जनाः निज-सन्देशं स्वीय-स्वरेण एव ध्वन्यङ्कितमपि कुर्वन्ति। मम प्रयासो भवति यदहं ‘मन की बात’-प्रसारणात् प्राक् अधिकाधिकानि पत्राणि टिप्पणीश्च स्वयमेव पठेयम्। अहम् अनेकाः दूरभाषाकारणाश्चापि शृणोमि। यथैव ‘मन की बात’-प्रसारण-कालः समीपमागच्छति, तदा तदवधौ भवद्भिः प्रेषितान् विचारान् परामर्शान् चाहं निगूढतया पठामि।

प्रतिपलं मम देशवासिनः मम मनसि विराजन्ते अतो यदापि

किञ्चित् पत्रं पठामि तदा पत्र-लेखस्य परिस्थितिः भावश्चमदीय-विचाराणामङ्गानि भवन्ति। तत्पत्रं मम कृते केवलमेकं कर्गदस्य अंशमात्रं नैव भवति, एवमपि अहं प्रायेण चत्वारिंशत्-पञ्चचत्वारिंशत्-वर्षाणि यावत् अखण्डरूपेण परिव्राजकस्य जीवनं यापितवान्, देशस्य जनपदानामधिसंख्यम् अगच्छम्, तथा च देशस्य सुदूरवर्ति-जनपदेषु पर्याप्तकालमहम् अनैषम् एतस्मात् कारणात् यदाहं पत्रं पठामि तदाहं सरलतया तेन स्थानेन तेन सन्दर्भेण चात्मानं संयोजयितुं शक्नोमि, ततः परं, कानिचित् तथ्यानि यथा ग्रामं जनस्य नाम चेत्यादीनि लेख्ये आरोहयामि। सत्यं पृच्छतु चेत् 'मन की बात'-प्रसारणे स्वरः मदीयोह्यस्ति परञ्च उदाहरणानि, भावाः, भावनाश्च मम देशवासिनामेव वर्तन्ते। 'मन की बात'-प्रसारणस्य कृते योगदान-प्रदात्रे प्रत्येकमपि जनाय धन्यवादान् व्याहर्तुमिच्छामि। एतादृशाः लक्षशो जनाः सन्ति येषां नामान्यहम् अद्यावधि 'मन की बात'-प्रसारणे नैव प्रासारयम्, परञ्च ते विनैव नैराश्यं निज-पत्राणि, प्रतिक्रियाश्च सततं प्रेषयन्ति - भवतां विचाराः, भवतां भावनाश्च मम जीवने अतितरां महत्त्वमावहन्ति। पूर्णतया विश्वसिमि यत् भवतां सर्वेषां वृत्तानि पूर्वतोह्यपेक्षया समधिकानि एवाप्स्यामि, तथा च, 'मन की बात'-प्रसारणं इतोह्यप्यधिकतरं रोचकं प्रभावकं समुपयोगिनञ्च करिष्यन्ति। एवमपि प्रयत्यते यत् यानि पत्राणि 'मन की बात'-प्रसारणे नैव समावेशितानि तानि पत्राणि परामर्शान् चाधिकृत्य सम्बद्धाः विभागाश्चापि अवदध्युः। अहम् आकाशवाण्याः, दूरदर्शन-दृश्यवाहिन्याः एफ.एम्.रेडियो-माध्यमस्य अन्यासाञ्च दृश्यवाहिनीनां, सामाजिक-माध्यमानाञ्च मम सहकर्मिभ्योह्यपि धन्यवादान् कथयितुमिच्छामि। तेषां परिश्रमेण एव 'मन की बात'-प्रसारणम् अधिकाधिक-जन-पर्यन्तं प्रयाति।

आकाशवाण्याः वृन्दं प्रत्येकमपि आख्यानम् अनेकासु भाषासु प्रसारयितुं प्रकल्पयति। केचन जनाः कुशलतया क्षेत्रीय-भाषासु प्रायेण मोदिनः स्वर-तुल्येन स्वरेण, तयैव शैल्या 'मन की बात'-प्रसारणं श्रावयन्ति। एवं रीत्या ते तत्त्रिंशत्-मिनिट्-पर्यन्तं नरेन्द्रमोदिनः एव भवन्ति। तानपि सर्वान् अहं तेषां प्रतिभायै दक्षतायै च वर्धापयामि, तेभ्यश्चधन्यवादान् व्याहरामि। साग्रहं भवतो निवेदयामि यद् भवन्तः सर्वे कार्यक्रममेनं निज-स्थानीय-भाषास्वपि अवश्यं शृण्वन्तु। सञ्चार-कर्मिणां सर्वेषामपि मित्राणां कृतेह्यपि हार्दिकान् धन्यवादान् वितरामि ये हि निज-निज-वाहिनीभ्यः 'मन की बात'-कार्यक्रमं नियमितरूपेण प्रसारयन्ति। न कश्चनापि राजनैतिक-जनः सञ्चार-माध्यमेभ्यः कदाचिदपि प्रसन्नो भवति, सोह्यनुभवति यत्तस्मै प्रसारणेषु अतिन्यूनः कालः प्रदीयते, आहोस्वित् तद्विषयकं प्रसारणं विधीयते चेत् तन्नकारात्मकं भवति परञ्च 'मन की बात'-इत्यत्र समुत्थापिताः अनेके विषयाः संचार-माध्यमैः स्वायत्तीकृताः। स्वच्छता, मार्गसुरक्षा, मादकौषध-मुक्तं भारतम्, selfie with daughter-चेत्यादि-विषयाः सन्ति यान् सञ्चारमाध्यमानि नवाचार-पद्धत्या अभियानरूपेण अग्रेसारितवन्ति। दृश्यवाहिन्यः प्रसारणमिदं सर्वाधिक-जनैः अवलोक्यमानमिति कार्यक्रमत्वेन प्रतिष्ठापितवत्यः - अहं सञ्चार-माध्यमानि हृदयेन अभिनन्दामि। भवतां सहयोगं विना 'मन की बात'-प्रसारणस्य यात्रेयमपूर्णा एव अभविष्यत्।

'नमस्कारः मोदिमहोदय! अहम् उत्तराखण्डस्य मसूरीतो निधि-बहुगुणा वदामि। अहं युव-सन्तति-द्वयस्य जननी अस्मि। प्रायेण अहम् अवालोकयम् यत् अस्मिन् वयसि स्थितेभ्यः बालेभ्यः नेदं रोचते यत् तैः किं करणीयमिति कृत्वा कश्चन तान् उपदिशेत् भवतु नाम ते शिक्षकाः वा तेषां मातापितरौ। परञ्च यदा भवतः 'मन की बात'-प्रसारणं भवति, भवान् च बालकान् सम्बोध्य किमपि वदति, तदाते हृदयेन तदवगच्छन्ति तथा च, तस्य कार्यान्वयनमपि कुर्वन्ति -अतः भवान् रहस्यमिदं अस्मभ्यमपि संविभाजयिष्यति किमु? धन्यवादः।'

निधि-महोदये, भवत्याः दूरभाषार्थं भूरिशो धन्यवादाः। वस्तुतस्तु मम पार्श्वे न किमपि रहस्यं वर्तते। यत्किमपि करोमि तत्सर्वं कुटुम्बेष्वपि स्यात् भवत्येव। सरलभाषया वदेयं चेत् तदा आत्मानं तस्मिन् युवजने अवतारयितुं प्रयते, आत्मानञ्च तस्य परिस्थितिषु भावयामि, तस्य विचारैः सह किञ्चित् सामञ्जस्यं स्थापयितुं, तेन साकम् अनुभूत्यैक्यञ्च कर्तुं प्रयते। अस्माकं निज-जीवनस्य या प्राचीना सामग्री, यदा सा बाधारूपा नैव भवति चेत् तदा कमपि अवगन्तुं सरलता भवति। कदाचित्तु अस्माकं पूर्वाग्रहाः एव संवादार्थं महत्तम-सङ्कट-रूपाः भवन्ति। स्वीकृत्यस्वीकृत्योः प्रतिक्रियाणाञ्चापेक्षया कस्यचिज्जनस्य स्थितेः अवगमनस्य कृतेह्यहं प्राथमिकतां ददामि। ममायम् अनुभवः यत् एतादृश्यां स्थितौ प्रतिवक्तापि अस्मान् अनुकूलयितुं विभिन्न-तर्काणाम् आपीडस्य चोपस्थापनापेक्षया अस्माकम् अनुभूत्यैक्यम् अवगन्तुं प्रयतते एतस्माच्च कारणात् सञ्चारान्तरालं समाप्नोति, ततः परं प्रकारान्तरेण तस्य विचारैः साकम् आवां द्वावपि सहयात्रिणौ भवावः। द्वयोरन्यतरः न मनागपि अवगन्तुं पारयति यत् कदा केन अन्यतरेण स्वीय-विचारान् त्यक्त्वा अपरस्य विचाराः स्वीकृताः स्वायत्ती- कृताश्च। अद्यतन-यूनामियं विशेषता यत् ते तादृशं किञ्चिदपि नैवाचरिष्यन्ति यस्मिन् हि ते स्वयं नैव विश्वसन्ति, तथा च, यदा ते कस्मिन्चित् विश्वसितुमारभन्ते चेत् ततः परं तदर्थं सर्वमपि त्यक्त्वा अनारतं तदनुकुर्वन्ति। प्रायेण जनाः कुटुम्बेषु वरिष्ठानां किशोराणाञ्च सञ्चारान्तरालं चर्चन्ते। वस्तुतस्तु कुटुम्बेषुप्रायेण किशोरैः साकं सम्वाद-परिधिः बहु सीमितो भवति। अधिकतर-कालार्थम् अध्ययनस्य चर्चा जायते आहोस्वित् प्रवृत्तेः वा व्यसनस्य वा जीवन-शैल्याश्च विषयमाधृत्य 'एवं कुरु, एवं मा कुरु' - इत्यादि प्रवर्तते। विनैव कामपि अपेक्षाम्, मुक्तमनसा विधीयमानं सम्वादजातम् - शनैः शनैः परिवारेष्वपि अतितरां न्यूनायते, तथा चायमपि चिन्ता- विषयोह्यस्ति।

अपेक्षापेक्षया स्वीकृतिः, निरसनापेक्षया च चर्चा विधीयते चेत् सम्वादः प्रभावीजायते। पृथक-पृथक-कार्यक्रमेषु आहोस्वित् सञ्चारमाध्यमानां माध्यमेन युव-जनैः साकं सततं सम्वादानुष्ठानस्य मदीयो यत्नो भवति। ते यत्किमपि कुर्वन्ति अथवा किं वा विचारयन्ति, तस्मादहं किमपि आत्मानं शिक्षयितुं प्रयते। तेषां पार्श्वे सदा विचार-भाण्डारो राजते। तेह्यतितरां ऊर्जावन्तः नवाचार-शीलाः अवधानपूर्णाश्च भवन्ति। 'मनकीबात'- माध्यमेनाहं यूनां प्रयासान्, तेषां वृत्तानि, अधिकाधिकं सम्विभाजयितुं प्रयते। प्रायेण परिदेवनं क्रियते यत् युवानोह्यधिकाधिकान् प्रश्नान् पृच्छन्ति। वदाम्यहं यत् नूनं भद्रमिदं यत् नवयुवानः प्रश्नान् उपस्थापयन्ति। वृत्तमिदं नूनं भद्रं यतो हि एवमामान्यते यत्ते सर्वेषामपि विषयाणाम् आमूलान्वीक्षणं कर्तुमिच्छन्ति। केचिद् वदन्ति यत् युव-जनेषु धैर्याभावो भवति, परञ्चाहम् आमिनोमि यत् यूनां पार्श्वे निरर्थकः कालो नैवास्ति - इदमेव तत्तथ्यं यदद्यत्वे नवयुवकाः समधिक-नवाचारशीलाः भवितुमर्हन्ति, यतो हि, ते कार्याणि त्वरितगत्या विधातुमीहन्ते। वयमनुभवामः यत् अद्यतन-युवानः अतितरांमहत्वाकाङ्क्षिणोभवन्ति, तथा च, अनेकान् बृहत्तरान् विषयान् विचारयन्ति। नूनं समीचीनमिदम्, ते बृहत्तराणि स्वप्नानि पश्यन्तु तथा च, बृहत्तराश्च सफलताः अधिगच्छन्तु ङ्कपरमार्थेन इदमेव अभिनवं भारतं वर्तते। केचन कथयन्ति यत् युवसन्ततिः एकस्मिन्नेव काले अनेकान् विषयान् अवधातुमिच्छति। वदाम्यहं यत् कोह्यत्र दोषः?। ते multitasking-इति बहुव्यापारेषु पारङ्गताः सन्ति अत एवमाचरन्ति। यदि वयं परिपार्श्वं पश्येम तदा, भवतु नाम सा सामाजिकोद्यमिता,Start-Ups, वा क्रीडा वान्यानि कानिचित् क्षेत्राणि - समाजे बृहत्-परिवर्तनकारिणो युवजनाः एव सन्ति। ते एव युवजनाः, ये प्रश्नान् अपृच्छन्, बृहन्ति स्वप्नानि द्रष्टुं साहसं च प्रदर्शितवन्तः। यदि वयं यूनां विचारान् क्रियया अन्वेतुं प्रयतेम तथा च, तान् विचारान् अभिव्यञ्जयितुम् उदारं परिवेशं दद्याम, तर्हि ते देशे सकारात्मकं परिवर्तनं विधातुमर्हन्ति - ते एवं कुर्वन्त्यपि।

मम प्रियाः देशवासिनः, गुरुग्रामतो विनीता-महोदया MyGov-इत्यत्र अलिखत् यत् 'मन की बात'-प्रसारणे मया श्वोह्यर्थात् नवम्बर-मासीये षड्विंशे दिने संपत्स्यमानस्य'संविधान दिवस'-स्य विषये किमपि वक्तव्यम्। तस्याः कथनानुसारेण, दिवसोह्ययं विशेषः यतो हि संविधान-स्वीकरणस्य सप्ततितमे वर्षे वयं प्रवेक्ष्यामः।

विनीता-महोदये! भवत्याः परामर्शार्थं भवत्यै भूरिशो धन्यवादाः। अस्तु, श्वः 'संविधान-दिवसो' वर्तते। तासां महतीनां विभूतीनां स्मरण-दिनमस्ति यैः अस्मदीयं संविधानं विरचितम्। विगते शताब्दे ऊन्पन्चात्तमे वर्षे नवम्बरमासे, षड्विंशे दिने अस्मदीयं संविधानमिदं स्वीकृतमासीत्। संविधानस्य प्रारूपार्थम्, अस्य चैतिहासिक-कार्यस्य पूर्णतायै सम्विधान-सभासप्तदश-दिनोत्तरै- कादश-मासाधिक-द्विवर्षात्मक-कालम् अनैषीत्। भवन्तः कृपया कल्पयन्तु यत् त्रिवर्षाभ्यन्तरमेव एताः महत्यो विभूतयः अस्मभ्यमेतावद्व्यापकं विस्तृतञ्च संविधानमादुः। एतैः यया असाधारण-गत्या सम्विधानं निर्मितं तद्धि अद्यापि काल-प्रबन्धनस्य उत्पादकतायाश्च उदाहरणत्वेन विद्यते। एते अस्मान् अपि स्वीयानि दायित्वानि आभिलेख्य-काले एव पूर्णतां नेतुं प्रेरयन्ति। सम्विधानसभा देशस्य महतीनां प्रतिभानां सङ्गमः आसीत्, तेषु प्रत्येकमपि निज-राष्ट्राय एतादृशमेकं सम्विधानं प्रदातुं प्रतिबद्धमासीत् येन भारतवासिनो जनाः शक्ताः स्युः, निर्धनतमोह्यपि जनः समर्थः भवेत्।

अस्मदीयस्य सम्विधानस्येदमेव वैशिष्ट्यं यत् अधिकार-कर्तव्य-विषयोह्यत्र विस्तरेण वर्णितः। नागरिकाणां जीवने एतद्द्वयस्य सामञ्जस्यमेव राष्ट्रमग्रे सन्नेष्यति। यदि वयम् अन्येषाम् अधिकारान् सम्मानयिष्यामः तदास्मदीयाः अधिकाराः स्वयमेव रक्षिताः भवितारः, तथा च एवंरीत्या यदि वयं सम्विधानेन निर्दिष्टानि स्वीय-कर्तव्यानि अनुपालयामश्चेत्, अस्माकम् अधिकाराः स्वतः एव रक्षिताः भविष्यन्ति। साम्प्रतमपि स्मराम्यहं- दशोत्तरोन्विंश-शततमे वर्षे, यदा भारतीयगणतन्त्रस्य षष्टि-वर्षाणि पूर्णानि, तदा गुजराते गजोपरि संविधानं प्रतिष्ठाप्य वयं शोभा-यात्रां व्यवस्थापितवन्तः। युव-जनेषु संविधान-विषयिणीं जागर्तिं विवर्धयितुं, तान् च सम्विधानस्य विविधैः पक्षैः संयोजयितुमयमेकः स्मरणीयः प्रसंगः आसीत्। विम्शत्युत्तर-द्विसहस्त्रतमे वर्षे गणतंत्र-रूपेण वयं सप्तति-वर्षाणि पूरयितास्मः तथा च द्वाविम्शत्युत्तर-द्विसहस्त्रतमे वर्षे अस्माकं स्स्वतन्त्रतायाः पञ्च-सप्ततिः वर्षाणि पूर्णानि भवितारः।

आगच्छन्तु, वयं सर्वेह्यपि स्वीय-संविधानस्य मूल्यानि अग्रेसारयेम तथा चास्मदीये देशे शांतिम्, समुन्नतिम्, समृद्धिञ्च सुनिश्चितां करवाम।

मम प्रियाः देशवासिनः, संविधानसभायाः सन्दर्भे तस्य महापुरुषस्य योगदानं न कदाचिदपि विस्मर्तुं शक्यते यो हि संविधानसभायाः केन्द्रीभूतोह्यवर्तत। अयं महापुरुषः आसीत् -पूजनीयःडॉ.बाबा-साहेब-अम्बेडकरः। डीसेम्बर-मासे षष्ठे दिने तस्य महापरिनिर्वाण-दिवसोह्यस्ति। अहं सर्वेषामपि देशवासिनां पक्षतः बाबा-साहब-वर्यं नमामि यो हि कोटि-कोटि-भारतीयान् ससम्मानं जीवनाधिकारं प्रादात्। लोकतन्त्रं नाम बाबा-साहब-वर्यस्य स्वभावे संसक्तमासीत् तथा च सः कथयति स्म यत् भारतस्य लोकतांत्रिक-मूल्यानि कुतश्चित् बहिस्तः नैवागतानि। किं नाम गणतंत्रम् भवति तथा च, का नाम भवति संसदीयाव्यवस्था? एतद्धि भारतस्य कृते किञ्चित् नूतनं वृत्तं नास्ति। संविधानसभायां सोह्यतितरां भावपूर्णं निवेदनम् अकरोत् यत् एतावत्-संघर्षानन्तरं प्राप्तायाः स्वतंत्रतायाः रक्षाअस्माभिः निज-रक्तस्य अन्तिम-बिन्दु-पर्यन्तं करणीयास्ति। सः इदमपि कथयति स्म यत् वयं भारतीयाः, भवेम नाम पृथक-पृथक-पृष्ठभूमिवन्तः परञ्च अस्माभिः देशहितं सर्वोपरि संधारणीयम्। सर्व-प्रथमं भारतमिति - डॉ. बाबासाहेबअम्बेडकरस्य मूलमंत्रमासीत्। पुनरेकवारं पूज्याय बाबा-साहब-वर्याय विनम्रःश्रद्धांजलिः।

मम प्रियाः देशवासिनः, दिवस-द्वय-पूर्वं नवम्बर-मासीये त्रयोविंशतौ वयं सर्वे श्री गुरु नानक देवस्य जयंतीमायोजितवन्तः तथा चागामिनि वर्षे अर्थात् ऊनविम्शत्युत्तर-द्विसहस्त्रतमे वर्षे वयं तस्य प्रकाशपर्व- इति सार्ध-पञ्च-शतीमा- योजयिष्यामः। गुरु नानक देव-वर्यः सदा अशेष-मानवतायाः कल्याणहेतोः चिन्तित- वान्। सः समाजं सर्वदा सेवा-करुणा-सत्य-कर्म-सौहार्द-मार्गं प्रादर्शयत्। देशः आगामिनि ऊनविम्शत्युत्तर-द्विसहस्त्रतमे वर्षे तस्य प्रकाशपर्व- इति सार्ध-पञ्च-शती-समारोहं भव्य-रूपेण आयोजयितास्ति, अस्य प्रकाशः न केवलं देशे अशेष-जगत्यपि प्रसरिष्यति। सर्वाण्यपि राज्य-प्रशासनानि केन्द्र-शासित-प्रदेशाश्चापि अवसरमेनं सोत्साहं हर्ष-प्रकर्षेण चायोजयितुमनुरुद्धाः सन्ति। एवं हि गुरोः नानक देवस्य सार्ध-पञ्च-शतवर्षात्मकं प्रकाशपर्व विश्वस्य सर्वेष्वपि देशेषु आयोजयिष्यते। अमुना सहैव, गुरु-नानक-देवेन संबद्धानां पवित्र-स्थलानां मार्गोपरि रेलयानमपि प्रचालयिष्यते। नातिचिरमेव, यदाहं एतद्विषयकम् उपवेशनम् आकारयन्नासम्, तस्मिनेव काले अहं लखपत-साहिब-गुरुद्वारा-स्थलं स्मारितवान्। गुजराते एकोत्तर-द्विसहस्त्र-तमे वर्षे समापन्नभूकंपावधौ तस्य गुरूद्वारस्य महती क्षतिः सञ्जातासीत्, परन्तु, येन प्रकारेण स्थानीय-जनैः सम्भूय राज्य-प्रशासनेन तस्य जीर्णोद्धार-कार्यं कारितं तद्धि अद्यापि उदाहरणरूपमेवास्ति।

भारतसर्वकारेण महान् एकः महत्वपूर्णः निर्णयो विहितोह्यस्ति यत् करतारपुर-corridor-इत्यस्य निर्माणं स्यादिति येन अस्माकं देशस्ययात्रिणः सरलतया पाकिस्ताने, करतारपुरे गुरु नानक देवस्य पवित्र-स्थलस्य दर्शनं कर्तुं शक्नुयुः।

मम प्रियाः देशवासिनः, पञ्चाशत्तमस्य आख्यानस्य अनन्तरं वयं पुनरेकवारं मेलिष्यामः आगामिनि 'मनकीबात'-प्रसारणे। विश्वसिमि यत् आद्योह्ययमवसरः यदा 'मनकीबात'-कार्यक्रमस्य पृष्ठभूम्यात्मकं वृत्तं भवतां समक्षम् उपस्थापितम्, यतो हि भवन्तः भवत्यश्च एतादृशान् एव प्रश्नान् अपृच्छन् परञ्च अस्मदीया यात्रैषा सततं प्रवर्तिता। भवतां साहचर्यं यावदधिकतरं भविता तावती यात्रास्मदीया इतः परमपि गहना घनिष्ठा सर्वेषाञ्च कृते संतोषप्रदा सेत्स्यति। कदाचित्तु जनानां मनस्सु प्रश्नः समुदेति यत् 'मनकीबात'-प्रसारणेन किमहम् अलभम्? अद्याहं कथयितुं वाञ्छामि यत् 'मनकीबात'-कार्यक्रमस्य याः प्रतिक्रियाः लभ्यन्ते, तासु अन्यतमं मम मनसोह्यतितरां स्पर्शकरं वृत्तमिदमेव, यत् जनानामधिसंख्यम् एतदकथयत् यत् यदा वयं कुटुम्बस्स्य सर्वैः सदस्यैः सम्भूय समुपविश्य च 'मनकीबात'-प्रसारणं शृण्मः,तदैवं प्रतीयते यत् अस्माकं कुटुम्बस्य अग्रणी अस्माकं मध्ये स्थित्वा अस्मदीयानि एव वृत्तानि अस्माभिः संविभाजयति। यदा वृत्तमिदम् अहं व्यापकरूपेण श्रुतवान् तदाहं संतोषाधिक्यम् अन्वभवम् यत् अहं भवदीयः, भवत्सु एवान्यतमः, भवतां मध्ये एवास्मि, भवन्तः एव मां प्रमुख-पदे अभिषिक्तवन्तः, तथा च एवंप्रकारेण अहमपि भवतां कुटुम्बस्य सदस्यरूपेण 'मनकीबात'-माध्यमेन पुनः पुनः आगमिष्यामि, भवद्भिः साकम् आत्मानं संयोजयिष्यामि। भवतां सुखानि दुःखानि च, मदीयानि सुखानि दुःखानि च, भवतामाकाङ्क्षाः, मदीयाः आकांक्षाः, भवतां महत्वाकांक्षाः,मामकीनाःमहत्वाकांक्षाश्च।

आगच्छन्तु,यात्रामेनां वयं इतोह्यप्यग्रे सारयेम। भूरिशो धन्यवादाः।

# वेव्ससंस्थायाः द्वाविंश-भारतसम्मेलनस्य उद्घोषः

सर्वाषां भारतीय कलानां मूलस्वरूपं वेदे प्राप्यते

वृहत्तर वैदिक परिषद (वैव्स WAVES) द्वाविंशति भारत सम्मेलने एकमतेन सर्वे विद्वांसः निष्कर्षोऽयं दत्तवन्तः यत् भारतीय या कला भारते अथवा विश्वे प्राप्यते सर्वाषां मूलं वेदे अस्ति। शिल्पकला, वास्तुकला, चित्रकला, लेखनकला, आभूषणकला, पहेलिकाकला, नाट्यकला, काव्यकला, ललितकला, संगीतकला, नृत्यकला, वाद्यकला, स्थापत्यकला युद्धकला एताषु





विषयेषु विभिन्न क्षेत्रतः समागतः प्रायसः अशीति विद्वान्सः स्व शोध पत्रं प्रस्तुतवन्तः। एते वैदिक ज्ञाने विचार विमर्शः कृवन्तः। वेव्स सचिव रनजितवेहेरा एवं डॉ. अपर्णाधीर खण्डेलवाल उद्घाटन व समापन सत्रस्य संचालनं कृतवन्तः।

इदं सम्मेलनं भारत विद्या प्रयोजना प्रकल्पस्य सौजन्ये इन्दिरा गाँधी राष्ट्रिय कलाकेन्द्रस्य सभागारे त्रि दिवसे सम्पन्नौ जातः। उद्घाटनं कलाकेन्द्रस्य सदस्यसचिव डॉ. सच्चिदानन्दजोशी भारतीय विद्याभवनस्य निदेशक श्री अशोक प्रधान, नेपालतः विशिष्टातिथि डॉ. संहिताशास्त्री अर्जुनप्रसादवस्तोला, भारतीयदर्शनपरिषदस्य अध्यक्ष प्रो. एस.आर.भट्ट, वेव्स अन्ताराष्ट्रिय अध्यक्ष प्रो. भूदेवशर्मा, वेव्स अध्यक्षा डॉ. शशि तिवारी, भारतविद्यापरियोजनायाः निदेशक डॉ. सुधीरलाल माध्यमेन दीपप्रज्वालनं कृतवन्तः। एवं स्मारिकायाः विमोचनमपि जातः।

अशोकप्रधान उक्तवान यत् वर्तमान शिक्षापद्धत्यां प्राचीन ज्ञान-विज्ञानस्य समन्वयस्य आवश्यकताऽस्ति। वेद समस्त ज्ञानस्य श्रोतोऽस्ति। डॉ.वस्तोला वेदे कृषि कलायाः। चित्रणं कृतवन्तः। ते उक्तवन्तः कृषिकला माध्यमेनैव मानवस्य विकास अभवत्। धन्वन्तरि चिकित्साकला माध्यमेन नूतन दिशा प्रदर्शितवन्तः। प्रो. भट्ट आनन्द मिमांसां भारतीय चिन्तनस्य मूल स्वरूपं उक्तवन्त। कला एवं आनन्दस्य आस्वादनं करोति। संस्कृति अस्मान् उत्कृष्टस्य पथे आनयति। येन आनन्दस्य प्राप्ति भवति। भूदेवशर्मा उक्तवान यत् वर्तमान शिक्षा पद्धत्यां भारतीय विद्यायां प्रदर्शमान मार्गान् अनुसरणस्य प्रेरणा दत्तवन्तः। डॉ. शशितिवारी सर्वेषां स्वागतं कृत्वा सम्मेलनस्य मुख्य विषये प्रकाशं दत्तवती।

# श्रीश्रीरविशंकरः मुस्लिमदेशसंयुक्तअरब-अमीराते अध्यात्म-योगस्य शिक्षणं दत्तवान्

दुबई। भारते प्रादूर्भूत आध्यात्मिक ध्यान एवं योगस्य इदामीं मुस्लिम देशे अपि मान्यता भवति। आध्यात्मिक गुरू श्री श्री रविशंकरः मध्यपूर्व एभियायाः मुस्लिमदेश संयुक्त अरब अमीरात शारजाहस्य दूबई स्थित वर्ल्ड ट्रेड सेन्टरे ध्यानयोगस्य आयोजनं कृतवान येषु भारतः पाकिस्तान, बंगलादेश, फिलीस्तान, सीरिया तथा यु.ए.ई. इत्यस्य सहस्त्र जनाः भागं गृहीतवन्तः। उपस्थित जनाः यत्र वाह्य एवं आन्तरिक शांति स्थापनाय ध्यानं दत्तवन्तः एवं हर्षध्वनि कृत्वा ध्यान योगस्य मंत्रस्य आत्यसातं कृतवन्तः। श्री श्री रविशंकरः स्व उद्बोधने अशांतेः कारणोपरि विस्तृतेन प्रकाशं दत्तवान एवं मनशुद्धता विषये अवधानं दत्तवन्तः।



उल्लेखनीयोस्ति यत् इदानीं यु.ए.इ इत्यत्र आत्महत्या अधिको जातः। ध्यान एवं योगस्य शिविरे अत्रत्याः जनाः बहु प्रभावितो जातः। दूवई राजपरिवारस्थ महिला अपि भागं गृहीतवन्तः। अत्रत्याः शासकः श्री श्री रविशंकरस्य भव्यस्वागतं कृतवन्तः।

# सत्संगज्ञानस्यभण्डारः मातासुदीक्षा

पानीपत। संत तिरंकारी मिशनस्य प्रमुख सुदीक्षा उक्तवती यत् सत्संग कोऽपि उत्सवः नास्ति अपितु अयमेकः ज्ञानी संतजनानां अद्वितीय सम्मेलनमस्ति। ज्ञानि सन्त जनानां आध्यात्मिक अनुभवेन् अस्मान् प्रेरणा प्राप्नुवन्ति। श्रद्धालु इदं श्रुत्वा तं आत्मसातं कर्तव्यम्। सुदीक्षा महराज अत्र संत निरंकारी आध्यात्यिक स्थले आयोजित समागमस्य द्वितीय दिवसं समोधयति स्म। सा उक्तवती यत् सत्संगेतस्य मर्यादा एवं अनुशासनस्य पालनं भवितव्यम् संतस्य वचनं श्रंत्वा तं स्वजीवने अनितव्यम्। संतस्य आशिर्वादः अस्माकं बलमस्ति। माता सुदीक्षा उक्तवती यत् मानवतायाः सेवा सर्वोपरि वर्तते। अस्मिन्नवसरे संत निरंकारी मंडलस्य महासचिव वी.डी.नागपाल तथा प्रेस प्रमुख उपस्थिताः आसन्।





अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दकुमारतिवारीः
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, राजेशझाः, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-21/5379/2014-16 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।